सुप्तौ आगमानित्यत्वस्य तीव्रादिधर्म्मोपेतत्वादिना सुगमत्वात् । तस्मान्निवर्त्तकधर्म्मानुष्ठानवशादीश्वरप्रसादसिद्धावभिमतेष्टसिद्धिरिति सर्व्वमवदातम्" । अस्याश्चात्मतत्त्वज्ञानहेतुत्वादात्मविद्यात्वम् । "त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ ! दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः" शा०प०५९अध्या० । "त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम् । "आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः" मनुः "तत्त्वौपनिषदं तात परिशेषन्तु पार्थिव । मथ्नामि मनसा तत्त्वं दृष्ट्वा चान्वीक्षिकीं पराम्" भा०शा०प० । "आन्वीक्षिकी कौशलानामिति"गीता । "सेयमान्वीक्षिकी विद्या प्रमाणादिभिः पदार्थैः प्रविभज्यमाना । प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् । आश्रयः सर्वधर्माणां विद्योद्देशे परीक्षिता" पक्षिलस्वामी । अन्वीक्षा शीलमस्याः तस्यै हितं वा ठक् । २दुर्गायाञ्च "आत्मवेदनशीलत्वादन्वीक्षणपराऽथ वा । अन्वीक्षाकारणत्वाद्वा तस्मादान्वीक्षिकी स्मृता" देवीपु० तन्निरुक्तिः ।

**आन्वीपिक** त्रि० अन्वीपं वर्त्तते ठक् । अनुकूले ।

**आप** प्राप्तौ वा चुरा०उभ० पक्षे स्वादि० प०सक० अनिट् । आपयति ते आपिपत् त । पक्षे आप्नोति आप्नुतः आप्नुवन्ति आप्नुयात् आप्नोतु आप्नोत् आप्नुवन् । आपत् आप आपथुः आपुः आपिथ । आप्ता आप्यात् आप्स्यति आप्स्यत् । आप्तव्यः आप्यम् आपनीयम् आप्ता आप्तः आप्तिः आप्त्वा अवाप्य । क्विप् ह्रस्वः आपः अपः अद्भिः । असुन् आपः । शतृ आप्नुवन् ताच्छील्ये चानश् आप्नुवानः । "अयशोमहदाप्नोति" "इहाग्र्यां कीर्त्तिमाप्नोति"मनुः । "नत्वेवाधौ सोपकारे कौषीदीं वृद्धिमाप्नुयात्" या०स्मृतिः "पुत्रमेवंगुणोपेतं चक्रवर्त्तिनमाप्नुहि"शकु० "येन श्रेयोऽहमाप्नुयाम्"गीता "स दुष्प्रापयशाः प्रापत्" रघुः । "शतं क्रतूनामपविघ्नमाप सः" रघुः । "यदिदं सर्वं मृत्युनाप्तम्"श्रुतिः "नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि"गीता । कर्म्मणि आप्यते आपि । प्रेरणे णिच् । आपयति ते आपिपत् त । सन् ईप्सति ईप्सितः । [प्राप्तिःसंयोगः स उदाहृतः" भाषा० ।

प्र–प्रकर्षेणाप्तौ प्राप्नोति प्राप्तः प्राप्तिः "अप्राप्तस्य च या

सम्+संपूर्णतायां समाप्तः समाप्तिः समापनम् । [साधनं"कुमा० ।

अव+प्राप्तौ, "अनवाप्तमवाप्तव्यम्"गीता "तपः किलेदं तदवाप्ति

परि+प्रचुरत्वे समर्थत्वे समुदितत्वे पर्य्याप्तः पर्य्याप्तिः । "सहि धर्मः सुपर्य्याप्तः सर्वस्य पदवेदने" गीताभा० । "अपर्य्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् । पर्य्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्"गीता ।

अनु+प्रा–पश्चात्प्राप्तौ "नदीं गङ्गामनुप्राप्ताः"भा०आ०प० ।

वि+विशेषेण आप्तौ व्याप्तिः व्याप्तः, व्याप्यः व्यापकः व्यापनम् "व्याप्तस्य पक्षधर्मत्वधीःपरामर्श उच्यते" । "व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः" भाषा० । "अस्यात्मनेपदित्वमपि स्वाराज्यं प्राप्स्यते भवान्" इति दुर्गादासः ।

**आप** पु० आप्यते आप–कर्मणि घञ् । अष्टसु वसुषु मध्ये ४र्थे वसौ, "धरो ध्रुवः सोमनामा तथापोऽप्यनिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः" विष्णुध० । "सव्यदक्षौ वसोर्यस्य चोर्द्धौ हस्तौ सशक्तिकौ । सोराङ्कुशान्वितौ चाधः स भवेदापसंज्ञकः"इति तद्ध्यानम् "आपश्चैवानिलश्चैव ववर्षतुररिन्दमौ" हरिवं०२४५अ० देवासुरयुद्धे । "आपस्य दुहिता भार्य्या सहस्य परमा प्रिया ! भूपतिर्भुवभर्त्ता चाजनयत् पावकं परम्" भा०व०२२१ अ० । भा०आ० प० ६६अ० तु "धरोध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः । धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा । चन्द्रमास्तु मनस्विन्याः श्वासायाः श्वसनस्तथा । वातायाश्चाप्यहः पुत्रः शाण्डिल्याश्च हुताशनः । प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौ स्मृतौ" इति आपस्थाने अह इति नामान्तरत्वेन कीर्त्तितम् कल्पभेदादविरुद्धम् । प्रभासस्यैव द्युनामता अष्टमस्य वसोः आपगेयशब्दे दर्शयिष्यमाणे भा० ९९अध्याये द्युनामतोक्तेः अपां समूहः अण् । २जलसमूहे न० । ३आकाशे निरुक्त० । तस्य सर्वमूर्त्तसंयोगित्वात्तथात्वम् ।

**आपक** त्रि० आप–ण्वुल् । प्राप्तरि । गौरा० स्त्रियां ङीष्

**आपकर** त्रि० अपकरे भवः अण् अञ् च । अपकरजाते स्त्रियां ङीप् ।

**आपक्व** न० ईषत् पक्वम् आ+पच–क्त । १ईषत्पक्वे कलायादौ भर्ज्जिते हरितयवादौ ( हडापोडा ) २ईषत्पक्ववस्तुमात्रे त्रि० । [पत्ये स्त्रियां क्रौड्या०ष्यञ् । आपक्षित्या ।

**आपक्षिति** पु० अपक्षितस्यापत्यम् इञ् । अपत्त्यापन्नस्या-

**आपगा** स्त्री आपेन जलसमूहेन गच्छति वहति ड । नद्याम् । "फेनायमानं पतिमापगानाम्" "सम्भूयाम्भोधिमभ्येति महानद्या नगापगा" माघः । "शिखरिणामिव सागरमापगाः" रघुः ।

**आपगेय** पु० आपगायां गङ्गायां भवः ढक् । गाङ्गेये भीष्मे तस्य